झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् राँची, झारखण्ड

वार्षिक परीक्षा 2022-23

मॉडल प्रश्न पत्र (विषयनिष्ठ)

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् राँची, झारखण्ड

कक्षा - द्वादश / विषय - संस्कृत /

समय- 1.30 घंटा / पूर्णांक- 40

---

सामान्य-निर्देशाः :-

1. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव कर्त्तव्याणि-

2. सर्वेषां प्रश्नानाम् संख्या 19 अस्ति ।

3. प्रश्न-संख्या 1 तः 7 पर्यन्तम् अति- लघूत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 2-2 अंकौ निर्धारितौ स्त:। केचन पंच प्रश्नान् उत्तरत।

4. प्रश्न-संख्या 8तः 14 पर्यन्तम् लघूत्तरीया: प्रश्ना: सन्ति।।अस्य कृते 3-3 अंका: निर्धारिता: ।केचन पंचैव प्रश्ना: समाधेया:।

5. प्रश्न-संख्या 15तः 19 पर्यन्तं दीर्घूत्तरीयाः प्रश्नाः सन्ति । अस्य कृते 5-5 अंकाः निर्धारिताः ।केचन त्रयैव प्रश्नान् उत्तरत।

---

**खण्ड -क**

**अपठितावबोधनम्**

**निर्देश: - अस्मिन् खण्डे सर्वे प्रश्ना: समानाङ्का:।केचन् पंचैव प्रश्ना: समाधेया:। 2*5=10**

अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारम् उत्तरत -

भारतदेश: आप्राचीनकालादपि विद्याप्रधान:। विद्याप्रदातार: गुरव: पूज्यतमा:। " गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वर:। गुरु: साक्षात् परं ब्रह्म, तस्मै श्री गुरवे नमः" इत्येव अस्माकं मूलमंत्र:। गुरुणा विना कापि विद्या पूर्णतां न प्राप्नोति। य: गुरुम् आद्रियते ,शुश्रूषते, गुरूपदेशान् आचरति, तस्मै विद्या स्वयं स्पृह्यति, गुरु: अपि तादृशं शिष्यं वात्सल्येन पश्यति, सर्वा: विद्या: शिक्षयति च।

**प्रश्ना:**

1. **पूर्णवाक्येन उत्तरत- 2**

   (क)क: खलु साक्षात् परं ब्रह्म?

   (ख) गुरु: कीदृशं शिष्यं वात्सल्येन पश्यति?

2. **यथानिर्देशम् उत्तरत- 2**

   (क)'प्राप्नोति' इति क्रियापदस्य कर्तृपदं किम् ?

   (ख) 'विद्याप्रदातार: ' इति विशेषणस्य विशेष्यं किम्?

   (ग)'आधुनिककालात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

   (घ)'सेवां करोति' इति अर्थे किं पर्यायपदम् अत्र प्रयुक्तम्?

**पठितावबोधनम्**

**अधोलिखितम् गद्यांशं, पद्यं नाट्यांशं च पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारं संस्कृतेन उत्तरत-**

**गद्यांश:**

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। द्वितीयरत्नेन भोजनादिकम् अमृततुल्यम् उत्पद्यते। एतेषां महात्म्यम् - एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। । तृतीयरत्नात् चतुरङ्गबलं भवति । चतुर्थाद् रत्नानिदिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।

3. **पूर्णवाक्येन उत्तरत-** 2

(क)द्वितीयरत्नेन किम् उत्पद्यते?

(ख) चतुर्थाद् कानि जायन्ते ?

4. **यथानिर्देशम् उत्तरत-** 2

(क)'ददाति' अस्य कर्तृपदं किम्?

(ख) 'राज्ञे' अस्य मूलशब्दं लिखत।

(ग)'विषम्' अस्य विलोमपदम् अत्र किम्?

(घ)'एतेषां महात्म्यम्' अत्र 'एतेषाम्' इतिपदं केभ्य: प्रयुक्तम्?

**पद्यम्**

सहसा विदधीत न क्रियामविवेक: परमापदां पदम् ।

वृणुते हि विमृश्यकारिणं,गुणलुब्धा: स्वयमेव सम्पद: ।।

**5. पूर्णवाक्येन उत्तरत- 2**

(क)सहसा किं न विद्धीत ?

(ख) अविवेक: कासां पदं वर्तते ?

**नाट्यांश:-**

**बटव:-** पश्यतु कुमारस्तावदाश्चर्यम् ।

**लव: -** दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्व:।

**बटव: -** कथं ज्ञायते ?

**लव: -** ननु मूर्खा: । पठितमेव हि युष्माभिरपि तत्काण्डम् ।किं न पश्यथ ? प्रत्येकं शतसंख्या: कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार:। यदि च विप्रत्ययस्तत्पृच्छत ।

6. **पूर्णवाक्येन उत्तरत-** 2

(क)कीदृश: अश्व: तत्र आसीत् ?

(ख) अश्वस्य रक्षार्थं कति रक्षितार: आसन् ?

**7. यथानिर्देशम् उत्तरत- 2**

(क)'पश्यथ' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) 'प्रत्यय:' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(ग)' निषङ्गिण:' अस्य विशेष्यपदम् अत्र किम् ?

(घ)'पश्यथ' इति पदस्य मूलधातु: लिखत।

**खण्ड** -ख

**निर्देश: -खण्डेऽस्मिन् सर्वे प्रश्ना: समानाङ्का:। केचन् पंचैव प्रश्ना: समाधेया:। 3*5=15**

**8. अधोलिखितश्लोकस्य अन्वयं पूर्णं कुरुत- 3**

**ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा कस्यस्विद् धनम् ।।**

**अन्वय:**

जगत्यां यत् किम् च .............इदं सर्वम्................. तेन त्यक्तेन भुञ्जीथा:, कस्यस्विद् धनं मा ...............।

9. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- 3

(क)योग: <u>कर्मसु</u> कौशलम् ।

(ख) पृथिव्या: <u>सप्त</u> भेदा:।

(ग)<u>कर्मणि</u> एव अधिकार: ते।

10.श्लोकांशमेलनं कुरुत- 3

| अ | ब |
|---|---|
| ददातिप्रतिगृहणाति | अन्धेन तमसाऽऽवृत्ता: |
| असूर्या नाम ते लोका | मा फलेषु कदाचन। |
| कर्मण्येवाधिकारस्ते | गुह्यमाख्याति पृच्छति। |

11.कोष्ठकेषु प्रदत्तपदेषु उचितं विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत - 3

(क)सीता ---------- सह वनं गच्छति।(राम)

(ख) ------------- अभित: वृक्षा: सन्ति।(ग्राम)

(ग)--------------- बहि: मन्दिरं शोभते।(नगर)

12.वाक्यनिर्माणं कुरुत - 3

(क)विद्यालय:

(ख) वयम्

(ग)सरोवरम्

13.अशुद्धिशोधनं कुरुत - 3

(क)चत्वारि बालिका: पठन्ति।

(ख) यूयम् किं कुर्वन्ति ।

(ग)छात्रौ पुस्तकम् पठति।

14.सन्धिविच्छेदं कुरुत - 3

(क)स्वागतम्

(ख) यशोदा

(ग)जगन्नाथ:

**खण्ड -ग**

**निर्देश: - खण्डेऽस्मिन् पञ्च प्रश्ना: प्रदत्ता: । केचन त्रयैव उत्तरत। 5*3=15**

**15.चित्रं दृष्ट्वा मञ्जूषासहायतया पंच वाक्यानि लिखत- 5**

**मञ्जूषा-**



| **तृणानि, वृक्षः, आकाशे, उदेति, सूर्यः, खगाः, हरितः, गृहाणि, पर्वताः, क्षेत्रम्** |
|---|

16.विद्यालयशुल्कक्षमापनार्थं स्वप्राचार्यं प्रति एकम् आवेदनपत्रं लिखत। 5

17.मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत।
5

स्वामिनो रामकृष्णपरमहंसस्य .......1..... एको योगी तं प्रति ईर्ष्यालुः अभवत्। एकदा सः स्वामिनम् अधः कर्तुम् तत्पार्श्वे गत्वा .......2...... किमस्ति कोऽपि चमत्कारो भवत्पार्श्वे ? रामकृष्णः अवदत्- "अहं तु ......3....... प्राणी।" योगी कथितवान्- "भवान् जलोपरि .......4........ शक्नोति किम्? जले चलन् मारुतिः अपि .......5.......अलङ्घयत्।अतः भवान् ......6.......जलोपरि चल।" रामकृष्णः प्रत्यवदत्- " नाहम् एतत् कर्तुं क्षमः।परमेश्वरः एतद् नादिशति तत्कथं .......7..... इमं श्रमं करिष्यामि।" योगी उच्चस्वरेण प्रत्यब्रवीत्- " अष्टादशवर्षाणि तपः तप्त्वा चमत्कारमिमं लब्धवान् अहम्।" योगिनः .......8...... श्रुत्वा स्वामी प्रत्युत्तरत्, "भवान् अष्टादशवर्षाणि जीवनं वृथा अकरोत्, अहं तु नाविकेन .......9.......गंगायाः पारं गच्छामि।किं भवतः अष्टादशवर्षाणाम् उपार्जनं नाविकस्य पणद्वयान् अधिकम् अस्ति?" स्वामिनो वचांसि श्रुत्वा योगी .......10....... सञ्जातः।

| चलितुम्, समुद्रम्, अब्रवीत्,पणद्वयेन,निरुत्तरः,परिवर्तितुम्,गर्वोक्तिम्,गङ्गायाः, सामान्यः,ख्यात्या । |
|---|

18.नाट्यसाहित्यस्य वैशिष्ट्यं प्रतिपादयत। 5

19. अधोलिखितरचनानां लेखकानां नामानि लिखत।(केवलं पंचानाम्) 5

(क) रघुवंशम्

(ख) पाषाणीकन्या

(ग) समुद्रसंगमः

(घ) शिशुपालवधम्

(ङ) उत्तररामचरितम्